# ॥ गौर्यष्टोत्तरशत नामावलिः॥

## gauryashhTottarashata naamaavaliH

ॐ महामनोन्मणीशक्त्यै नमः ॥
ॐ शिवशक्त्यै नमः ॥
ॐ शिवंकर्यै नमः ॥
ॐ इच्छाशक्ति क्रियाशक्ति ज्ञानशक्ति स्वरूपिण्यै नमः ॥
ॐ शान्त्यतीत कलानन्दायै नमः ॥
ॐ शिवमायायै नमः ॥
ॐ शिवप्रियायै नमः ॥
ॐ सर्वज्ञायै नमः ॥
ॐ सुन्दर्यै नमः ॥
ॐ सौम्यायै नमः ॥
ॐ सच्चिदानन्दरूपिण्यै नमः ॥
ॐ परापरामय्यै नमः ॥
ॐ बालायै नमः ॥
ॐ त्रिपुरायै नमः ॥
ॐ कुण्डल्यै नमः ॥
ॐ शिवायै नमः ॥
ॐ रुद्राण्यै नमः ॥
ॐ विजयायै नमः ॥
ॐ सर्वायै नमः ॥
ॐ शर्वाण्यै नमः ॥
ॐ भुवनेश्वर्यै नमः ॥
ॐ कल्याण्यै नमः ॥
ॐ शूलिन्यै नमः ॥
ॐ कान्तायै नमः ॥
ॐ महात्रिपुरसुन्दर्यै नमः ॥
ॐ मालिन्यै नमः ॥
ॐ मानिन्यै नमः ॥
ॐ मदनोल्लास मोहिन्यै नमः ॥
ॐ महेश्वर्यै नमः ॥
ॐ मातङ्ग्यै नमः ॥
ॐ शिवकाम्यै नमः ॥
ॐ चिदात्मिकायै नमः ॥
ॐ कामाक्ष्यै नमः ॥
ॐ कमलाक्ष्यै नमः ॥
ॐ मीनाक्ष्यै नमः ॥
ॐ सर्वसाक्षिण्यै नमः ॥
ॐ उमादेव्यै नमः ॥
ॐ महाकाल्यै नमः ॥
ॐ सामायै नमः ॥
ॐ सर्वजनप्रियायै नमः ॥
ॐ चित्पुरायै नमः ॥
ॐ चिद्घनानन्दायै नमः ॥
ॐ चिन्मय्यै नमः ॥
ॐ चित्स्वरूपिण्यै नमः ॥
ॐ महासरस्वत्यै नमः ॥
ॐ दुर्गायै नमः ॥
ॐ ज्वालादुर्गादिमोहिन्यै नमः ॥
ॐ नकुल्यै नमः ॥
ॐ शुद्धविद्यायै नमः ॥
ॐ सच्चिदानन्दविग्रहायै नमः ॥
ॐ सुप्रभायै नमः ॥
ॐ सुप्रभाज्वालायै नमः ॥
ॐ इन्द्राक्ष्यै नमः ॥
ॐ सर्वमोहिन्यै नमः ॥
ॐ महेन्द्रजालमध्यस्थायै नमः ॥
ॐ मायायै नमः ॥
ॐ मायाविनोदिन्यै नमः ॥
ॐ विश्वेश्वर्यै नमः ॥
ॐ वृषारूढायै नमः ॥
ॐ विद्याजालविनोदिन्यै नमः ॥
ॐ मन्त्रेश्वर्यै नमः ॥
ॐ महालक्ष्म्यै नमः ॥
ॐ महाकालीफलप्रदायै नमः ॥
ॐ चतुर्वेदविशेषज्ञायै नमः ॥
ॐ सावित्र्यै नमः ॥
ॐ सर्वदेवतायै नमः ॥
ॐ महेन्द्राण्यै नमः ॥
ॐ गणाध्यक्षायै नमः ॥
ॐ महाभैरवपूजितायै नमः ॥
ॐ महामायायै नमः ॥
ॐ महाघोरायै नमः ॥
ॐ महादेव्यै नमः ॥
ॐ मलापहायै नमः ॥
ॐ महिषासुरसंहार्यै नमः ॥
ॐ चण्डमुण्डकुलान्तकायै नमः ॥
ॐ चक्रेश्वर्यै नमः ॥
ॐ चतुर्वेद्यै नमः ॥
ॐ सर्वदायै नमः ॥
ॐ सुरनायिकायै नमः ॥
ॐ षट्शास्त्रनिपुणायै नमः ॥
ॐ नित्यायै नमः ॥
ॐ षड्दर्शनविचक्षणायै नमः ॥
ॐ कालरात्र्यै नमः ॥
ॐ कलातीतायै नमः ॥
ॐ कविराजमनोहरायै नमः ॥
ॐ शारदातिलकाकारायै नमः ॥
ॐ धीरायै नमः ॥
ॐ धीरजनप्रियायै नमः ॥
ॐ उग्रभार्यै नमः ॥
ॐ महाभार्यै नमः ॥
ॐ क्षिप्रमार्यै नमः ॥
ॐ रणप्रियायै नमः ॥
ॐ अन्नपूर्णेश्वर्यै नमः ॥
ॐ मात्रे नमः ॥
ॐ स्वर्णाकारतटित्प्रभायै नमः ॥
ॐ स्वरव्यंजनवर्णोदयायै नमः ॥
ॐ गद्यपद्यादिकारणायै नमः ॥
ॐ पदवाक्यार्थनिलयायै नमः ॥
ॐ बिन्दुनादादिकारणायै नमः ॥
ॐ मोक्षेशमहिष्यै नमः ॥
ॐ सत्यायै नमः ॥
ॐ भुक्तिमुक्तिफलप्रदायै नमः ॥
ॐ विज्ञानदायिन्यै नमः ॥
ॐ प्रज्ञायै नमः ॥
ॐ प्रज्ञानफलदायिन्यै नमः ॥
ॐ अहंकारकलातीतायै नमः ॥
ॐ पराशक्त्यै नमः ॥
ॐ परात्परायै नमः ॥

॥ इति गौर्यष्टोत्तरशत नामावलिः॥

---

Last updated on October 8, 1997; Send corrections to shree@usa.net